# जैनदर्शन विभाग
# केन्द्रीय संस्कृत विश्वविद्यालय,
# जयपुर परिसर, जयपुर

## फलितांशाः (Outcomes)

## शास्त्री– जैनदर्शनम्

फलितांशाः (Outcomes)–
एतस्य कार्यक्रमस्य परिणामाः–

- ❖ भारतीयदर्शनशास्त्रेषु जैनदर्शनस्य महत्त्वपूर्णं स्थानं वर्तते। तदध्ययनेन नैतिकमूल्यानां व्यक्तित्वविकासे समावेशो सम्भवति, यतः सभ्यसामाजिकाः भवितुमर्हन्ति
- ❖ जैनदार्शनिकसिद्धान्तानां परिज्ञानेन परोक्षापरोक्षविषयाणां लोकव्यवहाराणां च यथार्थप्रतिपत्तिः संभवति यतो जनाः स्वजीवने सदाचारमूलकं व्यवहारं कर्तुं सक्षमाः भवन्ति। ततश्च समाजविकृतयः तज्जीवनतो दूरीभवन्ति।
- ❖ जैनदर्शनशास्त्रेषु प्ररूपिताः ज्ञानमीमांसा–तत्त्वमीमांसा–आचारमीमांसा च मानवजीवनस्य उत्कर्षं यथा स्यात्तथोपदिशन्ति। मानवाधिकाराणां रक्षा इह प्रबलायते।
- ❖ उच्चशिक्षायाः कृते छात्रस्य अर्हता परिपुष्टा भवति –

1. स्नातकोत्तरविषयेषु प्रवेशः शोधकार्येषु च क्षमताविकासः सम्भवति।
2. शिक्षाशास्त्रिपाठ्यक्रमे प्रवेशार्हता ततश्च शिक्षाक्षेत्रे महनीययोगदानाय जैनदर्शनशास्त्रिछात्रः विशिष्टो भवति।
3. केन्द्रसर्वकारस्य राज्यसर्वकाराणां च प्रतियोगितापरीक्षासु प्रवेशार्हता सुनिश्चीयते।
4. व्यापारे वसति लक्ष्मीः इति वचनेन जैनदर्शनशास्त्रिछात्राः सदाचारमूलकस्वनैपुण्यवशात् तत्र व्यापारेषु सफलाः भवन्ति अन्येषां च कृते वृत्तिं प्रदास्यन्ति।

## शास्त्री प्रतिष्ठा –जैनदर्शनम्

फलितांशाः (Outcomes)–
शास्त्रिप्रतिष्ठोपाधिधारकछात्राः शास्त्रिछात्रेभ्यः तदधिकयोग्यतां समर्जयन्ति यतः ते–

- ❖ सम्पादकाः लेखकाः सुविचारकाः भवन्तः समाजोत्थाने साफल्यं लभन्ते।
- ❖ पाण्डुलिपीनां पठन–पाठने दक्षाः भवन्ति यतः शोधकार्येषु प्रवृत्तास्ते विद्यावन्तो भवन्ति।
- ❖ उच्चशिक्षाक्षेत्रे शिक्षकवृत्तिषु अधिकारिणः सन्तस्ते बहवोऽवसराः लभन्ते।
- ❖ शास्त्रिपाठ्यक्रमोत्तीर्णछात्राणां कृते स्वीकृताः फलितांशाः प्रतिष्ठापाठ्यक्रमाध्येतॄणां कृतेऽपि सुलभाः।

# आचार्य– जैनदर्शनम्

फलितांशाः (Outcomes)–

- ❖ अधीतविषयाः छात्राः तत्त्वं निर्णेतुं शक्नुवन्ति यतो यथार्थाऽयथार्थबोधेन तेषां जीवनं नैतिकं हितसम्पादकञ्च भवति।
- ❖ अन्तःशास्त्रीयविषयाणां सम्यगध्ययनेन तेषां प्रवृत्तिः गम्भीरा भवति। यतो वै जायते व्यक्तित्वविकासः सर्वेभ्यः सौख्यप्रदः।
- ❖ अद्यतनविकासमभिलक्ष्य ततोऽधिको विकासः स्यादिति ते सक्षमाः भवन्ति।
- ❖ स्वजीवने शास्त्रीयराद्धान्तानां मूल्यांकनं कर्तुं सक्षमाः भवन्ति। एतत्सर्वं दृष्ट्वा सामाजिकैः समाजोन्नतिं प्रति सन्नद्धाः भवन्ति।
- ❖ एतेषां छात्राणामभिरुचिः प्राशासनिकराजनैतिकदायित्वनिर्वहणापेक्षया अध्ययन–अध्यापनकर्म निर्वहणाय अधिकायते। संतोषवृत्तिश्च जीवने प्रबलायते यतः सुखकरं जीवनं भवति खलु आदर्शभूतम्।
- ❖ जैनदर्शनशास्त्रपरम्परायाः अधिगमेन सामाजिक–राजनैतिक–आर्थिक–धार्मिक क्षेत्रे च नैपुण्यं प्राप्यते। जैनदर्शनशास्त्रीयविचाराणां जीवनव्यवहारे आचरणं व्यक्तित्वविकासं करोति।
- ❖ भारतीयदर्शनशास्त्रेषु अनुसंधानं कर्तुं योग्यता भवति।
- ❖ विश्वविद्यालयस्तरे अध्यापनस्य अर्हता भवति।
- ❖ जैनदर्शनशास्त्रस्य विशिष्टग्रन्थानां तत्त्वबोधः जायते।
- ❖ पारम्परिकदर्शनशास्त्रीयसिद्धान्तानां समीक्षणं कर्तुं सामर्थ्यविकासो भवति।
- ❖ विश्वविद्यालयेषु अनुसंधानकेन्द्रेषु च विद्यावारिधिः (Ph.D) कार्यक्रमेषु प्रवेशार्हता भवति।
- ❖ नेट–जे.आर.एफ. परीक्षायां प्रवेशार्हता साफल्यं च भवति।

# विद्यावारिधिः – जैनदर्शनम्

फलितांशाः (Outcomes)–

- ❖ यथार्थवादित्वं जैनदर्शनस्य किमपि वैशिष्ट्यम्।
- ❖ भारतीयदर्शन/जैनदर्शनशास्त्रपरम्परायाः अधिगमेन नैतिक–सामाजिक–सांस्कृतिकदायित्वबोधयुक्तस्य नागरिकस्य निर्मिति भवति।
- ❖ जैनदर्शनस्य भारतीयदर्शनस्य विविधप्रस्थानानां च अधिगमेन ज्ञान–तत्त्व–आचारमीमांसीयविषयाणां समीक्षात्मकविमर्शयोग्यताव्यक्तित्वविकासश्च भवति।
- ❖ लेखनकौशलविकासो भवति।
- ❖ पाण्डुलिपि–सम्पादनस्य पाठसमीक्षणस्य च कौशलविकासो भवति।
- ❖ अनुसन्धानकौशलविकासो भवति।
- ❖ विद्यावारिधियुत्तरानुसन्धानपरियोजनासु (PDF) प्रवेशार्हता भवति।
- ❖ विश्वविद्यालयेषु महाविद्यालयेषु च सहायकाचार्यपदे कार्यं कर्तुम् अर्हता भवति।